R
S
V
L
00629

P15,A:12
N42

629

वैदिक-स्वराङ्कनरीति-प्रकाशः

स च

वैदिकानामुदात्तादीनां स्वराणामङ्कनमधिकृत्य तत्तच्छाखाभेदतः विशिष्टानां सतीनां तासां तासां रीतीनां स्वरूपनिरूपणेन वेदाध्ययनपराणां नितरामुपकुर्वाणः

सन्

लाभपुरस्थ-विश्वेश्वरानन्दवैदिकशोधसंस्थान-संचालकेन

विश्वबन्धुशास्त्रिणा

भीमदेवशास्त्रिणः साहाय्येन

स्वीय-वैदिकपदानुक्रमकोषभूमिकीय-पञ्चमप्रकरणतया

कृतः

263

लाभपुरे

स्वीये वि० वै० शो० सं०-मुद्रागृहेऽनुमुद्राप्य

विश्वेश्वरानन्दवैदिकशोधसंस्थानेन प्रकाशितः

(अधिकारसर्वस्वं सुरक्षितम्)

१मे संस्करणे १मः प्रकाशः
२५० प्रतिकृतयः

१९९९ वि०

विश्वेश्वरानन्द वुक [illegible]
संशोधित मूल्य (५नं०)
१)
साधु [illegible]

629
P15, A 2:12
N42



अथ

वैदिक-स्वराङ्कनरीति-प्रकाशः

संक्षेपाः

ऋ. = ऋग्वेद-
काठ. = (कृष्णयजुर्वेदीया-) काठकसंहिता-
काशब्रा. = काण्व-शाखीय-शतपथब्राह्मण-
तय. = तद्यथा
तु. = तुलनीय-
द्र. = द्रष्टव्य-
पृ. = पृष्ठ-
पृपृ. = (अनेकत्वे सति) पृष्ठ-
भू. = (प्रासङ्गिकग्रन्थीया-) भूमिका-
माशब्रा. = माध्यन्दिन-शतपथब्राह्मण-
मै. = (कृष्णयजुर्वेदीया-) मैत्रायणीयासंहिता-
यक्र. = यथाक्रमम्
वैतु. = वैपरीत्येन तुलनीय-
सात. = सातवलेकर-संस्कृत-

C. = Caland, W.
Sch. = Schroeder, L.
Web. = Weber, A.

ZDMG. = Zeitschrift der Deutschen Morgenlandischen Gesellschaft.

(क) अङ्कितस्वरा वैदिका ग्रन्थाः

यथोपलम्भं संहिताग्रन्थानां मध्ये सप्तसु तावत् सामग्र्येण स्वरोऽङ्कितो भवति। त एत ऋग्वेदो माध्यन्दिन-यजुर्वेदः काण्व-यजुर्वेदस्तैत्तिरीय-यजुर्वेदो मैत्रायणीय-यजुर्वेदः कौथुम-सामवेदः शौनकीयाऽथर्ववेदश्च सन्ति। ब्राह्मणा-ऽऽरण्यकानां च मध्ये यानि चत्वार्य् अङ्कितस्वराण्य् उपलभ्यन्ते, तानीमानि भवन्ति—काण्व-माध्यन्दिने शतपथब्राह्मणे च तैत्तिरीये ब्राह्मणाऽऽरण्यके च।

(ख) रेखीयो गम्यः प्रकारः

१. ऋग्वेदे तैत्तिरीय-यजुर्वेदे चोदात्तो नाम मुख्यः स्वरः स्वतोऽनङ्कितः सन्नन्यतोऽधोरेखितप्रागनुदात्ततोऽन्यतश्चोर्ध्वदण्डित-स्वरितितोत्तराऽनुदात्ततो विज्ञप्तो भवति, तय. अग्नये। स्वरितोत्तरवर्त्यनुदात्तमात्रमप्यधोरेखितोदात्त-स्वरितान्यतरोदयानुदात्तमनङ्कितं भवति, तय. अग्निमीळे पुरोहितम् (ऋ १, १, १) इत्यत्र पु° इत्येतद्वैपरीत्येन °ळे इति। अस्य खलु स्वरितोत्तरस्याऽनङ्कितस्य सतोऽनुदात्तस्योदात्ततयाऽऽभासो मा भूदित्यर्थं स्वरितस्य च तदुपरितनस्योदात्तस्य च मध्ये संकेतविशेषौ स्थाप्येते। तथाहि। यदा स्वरितो ह्रस्वो भवति, तदा ॑ इति, यदा चाऽसौ दीर्घस्तदा तस्मिन् स्वयमप्यधोरेखिते सति ॒ इति, तय. अप्स्व॑न्तः (ऋ १, २३, १९), क्वे॒दानीम् (ऋ १, ३५, ७)। उदात्त-स्वरितान्यतरोदयोऽनुदात्तोऽधोरेखितो भवतीति सूचितमिवाऽधस्तात्, तय. अग्निम्, कन्या। मन्त्राऽर्धादौ वा वाक्यादौ वा वर्तमानमनुदात्तमात्रमङ्कितं भवति, तय. अनुक्रामम् (ऋ १, १७, ३)।

२. अयमङ्कनप्रकारः शौनकीयाऽथर्ववेदे माध्यन्दिन-यजुर्वेदे काण्व-यजुर्वेदे यथामूलकोशं कपिष्ठलकठ-यजुर्वेदे चाऽपि लब्धप्रचारोऽभूत्। एवमपि तावद् उदात्ताऽनुदात्तयोर्विषये सामान्ये सत्यपि स्वरितस्य विषये सन्त्येव बाह्वृचतैत्तिरीयेतरग्रन्थीयाः केचिद् विशेषाः, तथाहि—

(अ) शौनकीयेऽथर्ववेदे स्वरतादुपरि ऽ इति संकेतो भवति, तय. वीर्यऽम्, सर्वा ह्यऽस्मिन् (११, ८, ३२), ज्येष्ठवरोऽभवत् (११, ८, १)। उदात्तादुपरितनः स्वरितस्तु बाह्वृचवत् साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. तं व्यूर्णुवन्तु सूतवे (१, ११,)। उदात्ते परतो ह्रस्वात् स्वरितादूर्ध्वदण्डितात् सत उपरि १ इति संकेतो भवति, तय. अप्स्व१न्तः (१, ४, ४)। तस्यैव दीर्घस्य सतस्तु संकेतो बाह्वृचनिर्विशेषो भवति, तय. विकेश्यो ३ वि घ्नताम् (१, २८, ४)।

(आ) माध्यन्दिन-यजुर्वेदे ⌐ इत्येतेनाधोदीर्घहस्तकेन स्वरितः साधारणयेन संकेत्यते, तय. दिवीव (६, ५), वीर्यमसि (१९, ९), आस्येन (२, ११)। उदात्ते परतस्त्वसावधस्त्रिशूलकेन संकेत्यते, तय. वीर्युं मयि (१९,९), अप्स्वन्तः (९, ६), योऽस्मान् (१, २६)। यदा तावत् स्वरितोदात्तयोर्मध्ये विरामो व्यवधत्ते, तदाऽधोदीर्घहस्तकस्यैवोत्सर्गो भवति, तय. वरूथ्यः। वसुः (३, २५)। यजुरादौ वाऽर्धचार्दौ वा वर्तमानश्चोदात्तादुपरितनभूतश्च स्वरितस्तु साधारणोनोर्ध्वदण्डेनैव संकेत्यते, तय. त्र्यम्बकं यजामहे (३, ६०), अवं देवं त्र्यम्बकम् (३, ५८), उर्व्या व्यद्यौत् (१२, १)।

(इ) काण्व-यजुर्वेद उदात्ते परतः स्वरितमात्रमधोरेख्यत इत्येव विशेषः[1], तय. अप्स्वन्तः (१०, २, ३), योऽस्मान् (१, ९, ४), प्रसवेऽश्विनोः (१, ३, ६)।

(ई) कपिष्ठलकठ-यजुर्वेदेऽन्यथा सर्वथा काण्व-यजुर्वेदेन स-प्रक्रिय एव वर्तमान उदात्तोदयोऽधोरेख्यमाणो ह्रस्वस्वरितो दीर्घतामप्यापद्यत इत्यस्त्येवाऽणीयान् विशेषः, तय. उर्वन्तरिक्षम् (१, २), अप्स्वान्तः (४८, ४)।

(ग) संख्याङ्कीयः सिद्धः प्रकारः

सामवेदे मूर्धन्यसंख्याऽऽत्मको विभिन्नः किल सिद्धः प्रकारः प्रवर्तते। एतदीया मुख्या विशेषा इमे सन्ति[2]--

१. सामान्येनोदात्तस्वरितानुदात्ता यथाक्रमं मूर्धन्यस्थितिभिः १, २, ३ इत्येताभिः संख्याभिः ससंकेता भवन्ति, तय. अग्निं वः (१, २१)।

२. परंपरिताऽनेकोदात्तमध्ये प्रथम एव लब्धसंकेतो भवति, तय. आ तु (१, १६७), स्पार्हं तद् आ (१, २०७), न हि (१, २४१)।

३. आवसानिक उदात्तः १ इत्यस्य स्थाने २ इत्यनेन संकेत्यते, तय. वयम् (१, १४)।

४. आवसानिकपरंपरिताऽनेकोदात्तमध्ये प्रथम एव नान्तरीयोक्तपूर्वया दिशैव च संकेत्यते, तय. महो२ हि षः (२, ९६), उतेद्याम् (२, १५६), नान्यं त्वत् (२, ३३४)।

५. अनुदात्तव्यवहितयोरुदात्तयोर्मध्ये प्रथमः २ इत्यनेन संकेत्यते, तय. अग्ने आ याहि (२, १०)।

६. यदा परंपरिताऽनेकोदात्ताऽनुग उदात्तोदयोऽनुदात्तो भवति, तदा परंपरितप्रथम उदात्तः २उ इत्येवं संकेत्यते, परश्च १ इत्येवम्, तय. शंयोरभि (१, ३३), वना त्वं यन्मातृः (१, ५३)।

७. परंपरितानेकोदात्ताऽनुगः स्वरितः २ इत्यस्य स्थाने २र इत्येवं संकेत्यते, तय. नि होता२र (१, १), निर्गा अकृन्तत् (१, ५८५)।

---

[1] अस्मदीये मूलकोषे माध्यन्दिनप्रकारीयः संभेदोऽपि लक्ष्यते। एतच्छाखीयत्वेनाऽनुदात्तभूमिस्वरितीयस्याऽधोवर्तुलकस्योपलम्भोऽपि परैः सूचितो भवति (तु. ZDMG ४९, १५१)।

[2] उदाहरणीयस्थलसंकेताः कौथुमसामवेदीया भवन्ति।

८. यदा उदात्तभूमिः स्वरित आवसानिको वाऽनुदात्तोदयो वा भवति, तदाऽसौ २र इत्येवं संकेत्यते, तय. ३क उक्थ्यम्२र (२, १११६), मनुष्येभि:३क२र (१, ७९), नीव२र (२, १००६), देव्येतु३क२र (१, ५६)।

९. उदात्तोदय उदात्तभूमिः स्वरितः २ इत्येवं संकेत्यते प्लुतिं चाऽऽपाद्यते, तय. पाह्यू३२३त द्वितीयया (१, ३६), अभ्या३२दिशः३२३ सूरः३२ (१, १२८)।

१०. उदात्त-स्वरिताऽन्यतरोदयपरंपरिताऽनेकाऽनुदात्तमध्ये चरम एव संकेत्यते, तय. समुद्रम्३१, इन्द्राभ्या३२दिश३२३: (१, १२८)।

११ स्वरितस्याऽनुगतया वर्तमानमनुदात्तमात्रं न संकेत्यते, तय. चित्रं३१ राधो२र अमर्त्य (१, ४०)।

१२. आवसानिकाऽनुदात्तोदयान्यतरस्वरितोदयोऽनुदात्तः ३क इत्येवं संकेत्यते (इह तु. अधस्तनम् ८मीयमुदाहरणम्)।

(घ) प्रथमः प्राक्तनो रेखीयः सिद्धः प्रकारः

अथ यो मुख्यस्योदात्त-स्वरस्य साक्षादिव संकेततः सिद्धंभावुकः प्राक्तनो रेखीयः प्रकारो मैत्रायणीय-यजुर्वेदे, काठक-यजुर्वेदे, पैप्पलादाऽथर्ववेदे चोपलभ्यते, स एवात्र संगृह्यते—

१. मैत्रायणीय-यजुर्वेदे काठक-यजुर्वेदे चोदात्त ऊर्ध्वदण्डयते, तय. अग्नि-।

२. उदात्तभूमेः स्वरितस्य कृते चोभयत्राऽधोभुग्नकः ८ इति सामान्यः संकेतो भवति, तय. दिवीव (मै १, २, १४), व्यसृपः (काठ ७, १२), शुण्ठोऽधि° (मै २, ६, १३), कृत्।

३. मैत्रायणीय-यजुर्वेदे सन्नतरो[1]ऽधोरेख्यते (तय. अग्नि-), काठक-यजुर्वेदे चासावधोदण्डेन संकेत्यते, तय. अग्नि-[2]।

४. उदात्तोदयस्य स्वरितस्य विषयेऽपि चैतयोः शाखयोर्मध्ये भवत्येव कियानपि वि-संवादः। तथाहि। मैत्रायणीयाः ३ इत्यङ्कं ततः पुरस्तात् प्रयुञ्जते, कठाश्च तं स्वरितमेव कारणसाधारण्येनाऽधोरेखयन्ति[3], तय. प्रस३वेऽश्विनोः (मै १, २, १५), वैतु. प्रसवेऽश्विनोः (काठ. २, ९)।

५. स्वरितीयह्रस्व-दीर्घ-भेदप्रयोजितस्तु नेहोभयत्र कोऽप्यवान्तरविशेषो भवति।

६. मैत्रायणीया अनुदात्तभूमेः स्वरितस्य कृते सामान्येन तिरोरेखां प्रयुञ्जते, तय. धियः।

७. सन्नतरोदयत्वे त्वस्याऽनुदात्तभूमेः स्वरितस्य कृते त ऊर्ध्वत्रिपुण्ड्रकं प्रयुञ्जते[4], तय. प्रथमः, प्रसवेऽश्विनोः (मै १, २, १५)।

८. कठा अनुदात्तभूमेः स्वरितस्य कृते सामान्येनाऽधोबिन्दुना निर्वाहं पश्यन्ति[5], तय. धियः।

---

[1] सन्नतरो नामोदात्तस्वरितान्यतरोदयोऽनुदात्तः प्रसिद्धो द्रष्टव्यः।

[2] Sch. त्वेतावधोरेखाऽधोदण्डौ न प्रयुक्तौ। अत एवेहाऽप्युदाहरणान्तरेष्वेतदप्रयोगो द्रष्टव्यः।

[3] Sch. त्वस्या अधोरेखायाः स्थान ऊर्ध्वबुध्नितं काकपदकं (ʌ) प्रयुङ्क्ते।

[4] मैत्रायणीयानां पदपाठ उक्तपूर्वो बाह्वृचः प्रकारो लब्धप्रतिष्ठोऽभूदित्यपरो विशेषोऽप्यत्र वैचित्र्यैकवृद्धिकरो भवति।

[5] Sch. अनुदात्तभूमेः स्वरितं नैव संकेतयति। सात. तु मूलोक्तस्थितिद्वयनिर्वाहाय यक्क. अधोहस्तकं (ㄴ) चाऽधस्त्रिशूलकं(ᴗ) च प्रयुङ्क्ते।

९. पैप्पलादाऽथर्ववेदेऽप्युदात्तीय ऊर्ध्वदण्डः प्रयुज्यते सन्नतरश्च काठक-यजुर्वेदवदधोदण्डेन संकेत्यते च, तय. दा॑ता॑ ।

१०. यत्तत्राऽनुदात्तभूमिः स्वरितोऽधोबिन्दुना सनाथ्यते तदपि काठकेन सामान्यमावहति, तय. का॑मः ।

११. माध्यन्दिन-यजुर्वेद-सामान्येन च मैत्रायणीय-काठकयजुर्वेद-भेदेन च तत्रोदात्तभूमिः स्वरितः साधारणयेनाऽधोदीर्घहस्तकेन द्योत्यते, तय. न्यक्, शर॒व्या॑ यां (१४, २, ७), त॒न्वा॑ शं॑तमया (१४, २, ८)।

१२. स्वरितादुपरितनस्योदात्तस्य यथावदूर्ध्वदण्डग्रहात् तस्य स्वरितस्य कृते विशिष्टतरं संकेतान्तरं नाऽपेक्ष्यते ।

१३. स्वरितादुपरितनस्याऽनुदात्तस्य त्वनुदात्तभूमिस्वरितवदुपचार इष्यते यावताऽसावधोबिन्दुना सनाथ्यते, तय. आ॑स्या॑य (१६, १०४, ६)।

(ङ) द्वितीयः प्राक्तनो रेखीयः सिद्धः प्रकारः

काण्व-माध्यदिनीययोः शतपथ-ब्राह्मणयोः केषुचिद् ग्रन्थान्तरेषु (तु. C. काशव्रा. भू. पृ. ९) चाऽपरः खलु रेखीयः सिद्धः प्रकारो लब्धप्रतिष्ठो भवति । इमे तावदेतदीया विशेषा भवन्ति—

१. अत्रोदात्तोऽधोरेख्यते[1] ऽनुदात्तश्चाऽनुदात्तभूमिः स्वरितश्च नाऽङ्क्येते, तय. अग्नि॒ना ।

२. उदात्तोदय उदात्तो नाऽङ्क्यते, तय. केतपूः के॒तम् (५, १, १, १६)[2] ।

३. परंपरितानां सतां बहूनामुदात्तानां मध्ये चरम एवाङ्क्यते, तय. अग्निर्हि वै धू॒रथ (१, १, २, ९)।

४. उदात्तभूमि-स्वरितस्य संकेतार्थं तदुदयमक्षरमधोरेख्यते[3], तय. वी॒र्यम् ।

५. एवं तावदुदात्तभूमि-स्वरितोदयेऽक्षर उदात्ते सति तदीयाऽधोरेखा तस्य चोपरितनस्य स्वरितस्य च समानं ग्राहिका भवति । एवं च स्थिते तदुदयमुदात्तान्तरं चेद् भवति, तर्हि तन्नाङ्क्यते, तय. यज्ञो वै॒ स्वः (१, १, २, २१), मानुषं ने॒द् व्यृद्धम् (१, ७, २, ९), वैतु. इ॒ति॒ सैषा (१, ४, १, २६) यत्र तिकारोऽनुदात्तः सन्नात्मोदयोदात्तेकारीयाऽधोरेखाया अन्यथासाधने प्रयोजको न भवति ।

६. उदात्त-स्वरिताऽन्यतरोदयस्य स्वरितस्य तूक्तपूर्वः संकेतो न व्याहन्यते, तय. यज्ञो वै॒ स्वर॒ग्॒ः (१, १, २, २१), देवा वै॒ स्वर॒गन्म (१, ९, ३, १४), इ॒ति॒ सै॒षैतम् (१, ४, १, २६)।

७. करिडका-ब्राह्मणान्यतराऽवसानीय उदात्तः करिडका-ब्राह्मणान्यतराऽऽद्य उदात्ते परतस्त्रिभिरधोबिन्दुभिः संकेत्यते[4], तय. देवत्रा ॥ स॒ः (५, १, ४, ७ उ)।

८. उदात्तो वाऽनुदात्तो वाप्यावसानिकः सन् स्वरिते परत एवमधोबिन्दुत्रिकेण संकेत्यते, तय. इ॒ति॒ ॥ तेऽविदुः (३, ४, ३, ७ उ), प्रतिप्रस्थाता ॥ सोऽध्व° (४, २, १, १३ उ)।

९. यदाऽऽवसानिकस्याऽपि सतोऽक्षरस्य परेणाऽक्षरेण संहिते पाठे सति स्वरितः संभवति, तदा तदुदयस्योपान्त्यस्याऽक्षरस्यैवमधोबिन्दुत्रयेण संकेतो भवति, तय. एव । एत॒त् (३, ४, २, १३)।

---

[1] तु. C. काशव्रा. भू. पृ. ९ यत्र भाषिकस्वरस्य स्वरूपत आलोचनायां प्रवृत्तायां पुरातन उदात्तः कालेनाऽनुदात्ततां गत इत्यभिप्रायः परकीयो वादः प्रत्युक्तो भवति ।

[2] एतत्खण्डोदाहरणीयस्थलसंकेताः माशव्रा. द्र. ।

[3] web. अत्राऽधोरेखाद्वयं प्रयुक्तं द्र. ।

[4] web. तावदेषा स्थितिर्द्वाभ्यामधोबिन्दुत्रिकाभ्यां संकेत्यते ।

R S V L 00629

१०. अङ्कितस्य सत उदात्तस्याऽनुनासिकतां प्राप्तावनुनासिकचिह्नमप्यधोरेख्यते, शत॒ꣳ-शत॒ꣳ ह (३, ४, ३, १८); वैतु. यज्ञꣳ सुमभरन् (३, १, ४, ४) ।

(च) एतत्कोषीयो रेखीयः सिद्धः प्रकारः

१. एवं तावद् यत्र कुत्रचित् किंचित् सामान्यमपि बिभ्राणेषु प्रायेण त्वन्योन्यं नितरामिव विशिष्यमाणेष्वेव पुरातनेषु बहुषु स्वराङ्कनप्रकारेषु विद्यमानेष्वपि कथमिव सर्वशाखीयसौवरस्थितिर् नाम केनाऽपि शाखासर्वस्वसाधारणतां भजमानेन सता प्रकारविशेषेण युगपदेव हस्तामलकीक्रियेतेत्येवमभिप्राया खलु प्रक्रियमाणस्य सतोऽस्य समस्तवैदिकवाङ्मयस्य प्रातिनिध्यमिव कुर्वाणस्य चैतिहासिकदृष्ट्या तदीयतुलनात्मकाऽध्ययनमधिकृत्यौपयिकतां बिभ्राणस्य च कोषस्य बलवत्यपेक्षाऽभूत् ।

२. अस्याश्चाऽपेक्षायाः पूर्त्यर्थं यः सम्यग् विचारितः सन् पुराणानां प्रकाराणां सारायमाण इव प्रकारविशेषोऽत्र लब्धप्रवेशो भवति, स सर्वेषां प्रेक्षकाणां प्रकाममभिमतः सन् सुकरत्वाच्च सुग्रहत्वाच्चाऽपि सर्वत्र भविष्यति प्रकाशमेष्यत्सु वैदिकग्रन्थीयसंस्करणेषु चरिताथ्यैंत ।

३. अस्मिंस्तावत् प्रकारेऽनुदात्तमात्रमनङ्कितं भवति । अनुदात्तो ह्युदात्ताऽभावस्य संज्ञा भवति । अस्य नीचैस्त्वं नामाऽऽपेक्षिको धर्मो भवति । उदात्त एव किल मौलिक आर्यभाषीयः स्वरो भवति । तदपेक्षयाऽनुदात्तो नीचैरुच्चार्यते । यदाऽयमुदात्तोदयो भवति, तदा भूयोऽपि नीचैर्गत इव लक्ष्यमाणः सन् सन्नतर इत्युच्यते । यदा चायमुदात्ताऽनुगो भवति, तदाऽस्मिन् सोपानक्रमिकस्य सतः स्वराऽवरोहस्य लक्ष्यमाणत्वादाद्यंशत उदात्तधर्मताया: समावेश इव भवति, तेन चाऽयं समाहाररूपः सन् स्वरित इत्युच्यते । छायारूपस्त्वयं भवति । न ह्यस्याऽनुदात्तभूमेः सतः काऽपि प्रागुदात्तस्वतन्त्रा सती प्रातिस्विकी स्थितिर्भवति । तथा ह्युदात्तान्तरोदयत्वे सत्ययमनुदात्त एव सन् सन्नतरतामुपगतोऽनुदात्त एव पुनर्भवति । एवं तावच् शुद्धो वा सन्नतर-स्वरिताऽन्यतरत्वोपाधिको वाऽनुदात्तः पूर्वोत्तरान्यतरपार्श्ववर्तिनः सन्नतर-च्छायास्वरिताऽन्यतरव्यवहितस्य वा नान्तरीयतया स्थितस्य वोदात्तस्यैव स्थितिलक्षकमात्रतामनुप्राप्तः संस्तदीयाऽङ्कनत एव स्वतःसिद्धविज्ञप्तिकयथायोगविभिन्नोक्तपूर्वावान्तरस्वरूप इति कृत्वैव नैतदीयाऽन्यथासिद्धाङ्कनगौरवमिहाऽऽद्रियते ।

४. यदधस्तादुदात्तो मौलिकस्वर इति कृत्वाऽङ्कनार्हत्वेन प्रत्यपादि, तत्र खलूदात्तभूमेः सतोऽभिनिहितप्रश्लिष्ट-क्षैप्र-जात्याऽन्यतमत्वेन प्रातिस्विकस्थितिमतो वास्तविकस्य स्वरितस्याप्यङ्कनार्हत्वस्य समावेशोऽभिप्रेतो भवति[1]। एवं तावदुदात्तश्चोदात्तभूमिः स्वरितश्च द्वावेव स्वराविह पार्थक्येनाऽङ्कनमर्हत इति कृत्वा पुरातनानामुक्तपूर्वाणां संकेतानामेव मध्याद् ऋग्वेदे, तैत्तिरीय-यजुर्वेदे, तैत्तिरीय-ब्राह्मणे, तैत्तिरीयाऽऽरण्यके, तैत्तिरीयोपनिषदि, काण्व-यजुर्वेदे, कपिष्ठल-कठ-यजुर्वेदे चैकान्तिकतया, माध्यन्दिन-यजुर्वेदे, शौनकीयाऽथर्ववेदे च यथास्वोक्तपूर्वप्रक्रियं पर्याप्ततया, स्वरितसंकेतत्वेन प्रयुक्तपूर्वत्वादूर्ध्वदण्डः (=अ॑) एव चोदात्तभूमिस्वरितस्य, शातपथप्रसिद्धिरधोरेखा (=अ॒) चोदात्तस्य संकेतौ निर्धारितौ भवतः[2] ।

५. ये चैतद्ग्रन्थीय-स्वराङ्कनीया व्यावहारिका विशेषा भवन्ति, त इमे संगृह्योल्लिख्यन्ते—

(क) अगतिका वा सगतिका वा मूलधातवश्च, क्विब्-णिजन्यतरान्ता नामधातवश्च तदीयविभिन्नस्वराणां सतां रूपाणामसंभिन्नं संकेतनं सुकरं स्यादिति स्वरतो नाङ्क्यन्ते, तय. √१अक्ष्, √२अक्ष्,

---

[1] मूलतो जात्य-क्षैप्रयोरभेदो द्रष्टव्यः (तु. पृपृ. ४२७ʲ, ५३७ˡ, ५३८ᵖ) ।

[2] तस्मिंस्तस्मिन् पुराणे वा नूतने वा सौवरे संकेते प्रतिनियतायाः स्वरविशेषसंकेतनविषयायाः स्वाभाविक्याः शक्तेरभावाद् यथासमयं शक्तिविशेष उपाधीयत एव ।

अति√मुच्, अख्खली√कृ, √अव् > √ओम्, अन्त- >√अन्ति ।

(ख) नामधात्वन्तराणि तु स्वरतः संकेत्यन्ते (तु. भू. ४, २, क, ७, अ), तय. अघ->√अघाय् ।

(ग) तिङन्तानि रूपाणि स्वरतः संकेत्यन्ते, तय. √१अक्ष् >अक्ष्णुते ।

(घ) संनिहितपदान्तरनिमित्तप्रयोजितनिघातानि तिङ्-रूपाणि स्वरतो न संकेत्यन्ते[1], तय. √१अक्ष् >अक्ष्णुयात् ।

(ङ) अनङ्कितस्वर-संस्करणेभ्यो ग्रन्थेभ्यः संगृहीतानि सन्ति तिङ्-रूपाणि तदीयशब्दान्तरसामान्येनाऽनङ्कितान्येव ध्रियन्ते, तय. √अज् >अजामसि, अजन् ।

(च) यदाऽङ्किताऽनङ्कित-स्वरेभ्य उभयेभ्यो ग्रन्थेभ्यस्तिङ्-रूपाणि संगृह्यन्ते, तदाऽनङ्कितस्वर-ग्रन्थीयानि तिङ्-रूपाणि यथाऽङ्कितस्वरग्रन्थीयस्वरवच्छ्रुति[2] निर्दिश्यन्ते, तय. अनु √ध्व(ध्वं)स्>अनुदध्वसे ।

(छ) अङ्कितस्वर-ग्रन्थीयं सुब्योगीयं वाऽव्ययं वा कृन्मात्रं स्वरवद् निर्दिश्यते, तय. √अत्>अतत्-अतिथि-, √अद्>अत्तवे, अत्तुम् ।

(ज) अनङ्कितस्वर-ग्रन्थीयः कृद् निःस्वरं निर्दिश्यते, तय. अग्नि-मेदिन्–, अग्नि-यानी- ।

(झ) अङ्किताऽनङ्कितस्वरेभ्य उभयेभ्यो ग्रन्थेभ्यः संगृह्यमाणः कृद् यथास्वरवद्ग्रन्थीयश्रुति निर्दिश्यते[3], तय. अंशु- ।

(ञ) व्युत्पत्त्यौपयिकतयोपकल्पितानां कृतां स्वरनिर्देश औपकल्पनिको भवति, तय. *अन्तः(<र्)-पर्शु- ।

(ट) यदा व्युत्पादनप्रयोजितः सन् स्वर उपकल्पनाया विषयो भवति, तदा स्वरवदक्षरं स-तारकं निर्दिश्यते, तय. अच्छ्*रा-, अष्टा-दंष्ट्*- ।

(ठ) यदौपकल्पनिकस्य सतः कृतो विषये सौवरी स्थितिर्दुर्विनिगमना भवति, तदाऽसौ निःस्वरं निर्दिश्यते, तय. √अट् > अट्णार->आट्णार- ।

(ड) निघातमात्रवन्ति सर्वनामानि निःस्वरं निर्दिश्यन्ते, तय. अस्मद्-> २*अँ(>न्)-, *ई-, *सी-, एन-, सम-, त्व- ।

(ढ) निहताऽनिहतोभय-प्रयोगवन्ति सर्वनामान्युभयथा पृथग् निर्दिश्यन्ते, तय. इदम्-> ३अ-, ४अ-; अस्मद्-> १मय्-, २मय्- ।

(ण) अलुक्-समासे पूर्वपदायमानानि चाऽवान्तरप्रातिपदिकीक्रियमाणानि च सन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अग्र->अग्रे ।

(त) द्वैस्वर्येण श्रूयमाणाः समासास्तथैव निर्दिश्यन्ते, तय. बृहस्पति-, वनस्पति-, अग्नी-वरुण- ।

---

[1] अस्य ग्रन्थस्य यथाश्रुतानुक्रमणस्वरूपताया एतदीयलक्षणशास्त्रस्वरूपताऽतिरेकित्वादित्यभिप्रायः ।

[2] अपि तानि स्वरतो वस्तुतस्तथा स्युर्न वा स्युरित्यस्य तत्तन्मूलीयवाक्यस्वतन्त्रविचाराधीनत्वादस्मिन् विषयेऽत्रत्यो निर्देशोऽप्रमाणं भवति ।

[3] अप्यस्वरवद्ग्रन्थीयोऽनेकाच् कृद् वस्तुतो यथानिर्दिष्टस्वरो भिन्नस्वरो वेत्यत्राऽयं निर्देशोऽनैकान्तिको भवति ।

CATALOGUED
629

(थ) यथाप्रातिस्विकप्रातिपदिकस्वरवन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अंहस्->-हसः (=अंहसः)।

(द) हल्पूर्वोदात्तयण्भाव-प्रयोजितः[१] सुब्-उदात्तो न निर्दिश्यते, तय. ऊति>-त्या(=ऊत्या)।

(ध) यदा सुपि परत उदात्तयोर् इवर्णोवर्णयोः स्थानेऽन्यतः अय् इति वा इय् इति वाऽन्यतश्च अव् इति वा उव् इति वा भवतः, तदा सुब्-रूपं निःस्वरं निर्दिश्यते, तय. अग्नि->-ग्नयः (=अग्नयः), धी-> धियः (=धियः), अंशु-> -शवः (=अंशवः), अग्रू-> -ग्रुवः (=अग्रुवः)।

(न) उदात्तयण्भाव-प्रयोजितः सुप्-स्वरितो यथावद् निर्दिश्यते, तय. १अरुणी->ण्र्यः, अश्वतरी->-र्यः।

(प) यदा प्रातिपदिकनिघात-प्रयोजकः सुप्-स्वरः प्रवर्तते, तदाऽसौ यथावद् निर्दिश्यते, तय. अघायत्->-यते, १अप्-> अपः, २अप्-> अद्भिः।

(फ) उदात्तनिवृत्तिप्रयुक्तः सुप्-स्वरो यथावद् निर्दिश्यते[२], तय. असन्->-स्नः, अस्थन्->-स्थ्नः।

(ब) आद्युदात्त-निघातोभयविधमामन्त्रितं पदं स्वीयसंकेतविशेषभूत-वर्तुलकीयाया अधोरेखाया भावाऽभावाभ्यां यथायोगं विविच्य निर्दिश्यते, तय. १अक्ष->-०क्ष, २अक्ष->-०क्षाः, आदित्य->-०त्य।

(भ) निःस्वरं निर्दिश्यमानानि प्रातिपदिकान्यनुबध्नन्ति सुब्-रूपाणि कैमुतिकेनैव निःस्वरं निर्दिश्यन्ते, तय. अ-कृतपूर्व- > -र्वम्, अस्मद्- > (*अँर्>* अँ>) न्- >नौ, नः।

(म) साम्रेडितानां सुब्-रूपाणां नियताऽऽम्रेडितांशनिघातानां सतां निर्देश उक्तपूर्वसुब्रूपीयनिर्देशसामान्यमेव बिभर्त्ति, तय. अंशु->-शुः-शुः (=अंशुः-अंशुः)।

(य) अव्यय-मात्रं यथास्वरश्रुति निर्दिश्यते, तय. अनु, अभि, एतवै।

(र) सस्वरनिःस्वरोभयविधश्रुतिकमव्ययं यथायथं पार्थक्येन निर्दिश्यते, तय. १कम्, २कम्, १यथा, २यथा।

(ल) निहतमात्रस्वरूपमव्ययं तथैव निर्दिश्यते, तय. इव (तु. भू. ४, ४, च, ४), उ, घ।

(व) सस्वरनिःस्वरोभयविधश्रुतिकं समासाङ्गभावुकमव्ययं यथायथं विविच्य निर्दिश्यते, तय. अति-√पू>अतिपवते, अतिपवते, अप√गु(>गू)ह्>अप-गूळह-, अप-गूहमान-।

---

[१] वैतु. पृ. ५८८ᵇ (तु. उपरिष्टात् फ च)।

[२] तु. पृ. ५८८ᵇ यदन्वधस्ताद् (द) इत्यत्र प्रत्तमुदाहरणमप्यस्यैव नियमस्य विषयो भवति।

सूचना

अस्य ग्रन्थस्य च सांस्थानिकेन विक्रय-विभागेन विक्रीयमाणानां ग्रन्थान्तराणां च प्राप्तेर्वा तद्विषये परिचयविशेषस्य वा कृतेऽयं तावत् पत्रव्यवहारसंकेतो द्रष्टव्यः —

विक्रयविभागस्याऽध्यक्षः,
विश्वेश्वरानन्दवैदिकशोध-संस्थाने,
नाभा-भवने, लाभपुरे (भारते)।

V. V. R. I. Press, 17, Maclagan Road, Lahore.

VISHVESHVARANAND VEDIC RESEARCH INSTITUTE HOSHIARPUR LIBRARY
P 15, A : 12
629
N 12

